संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् ।

वस्तुनिष्ठ प्रश्नोत्तराणि →

1. प्र० → सर्वधनेषु द्रव्येषु वा उत्तमं धनं किम् ? उ० → विद्या ।
2. प्र० → विद्या किं ददाति ? उ० → विनयम् ।
3. प्र० → का विद्या वृद्धत्वे हास्याय भवति ?
   उ० → शास्त्रविद्या वृद्धत्वे हास्याय भवति ।
4. प्र० → का विद्या सदा आद्रियते ?
   उ० → शास्त्रविद्या सदा आद्रियते ।
5. प्र० → हितोपदेशे कानि प्रकरणानि ?
   उ० → चत्वारि प्रकरणानि । तानि नामानि सन्ति → मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिश्च ।
6. प्र० → हितोपदेशस्य ग्रन्थस्य कर्ता, रचयिता, लेखकः, कविर्वा कः ?
   उ० → श्रीनारायणपण्डितः ।
7. प्र० → हितोपदेशस्य मित्रलाभे कियन्त्यः कथाः वर्तन्ते ?
   उ० → अष्ट कथाः वर्तन्ते ।
8. प्र० → भागीरथीतीरे किं नाम नगरम् ? उ० → पाटलीपुत्रम् ।
9. प्र० → तत्र किं नाम राजा आसीत् ? उ० → सुदर्शनः ।
10. प्र० → अनर्थाय कानि सन्ति ? उ० → अनर्थाय यौवनं, द्रविणं, प्रभुत्वम्, अविवेकत्वञ्च सन्ति ।
11. प्र० → केन पुत्रेण न कोऽपि लाभः ?
    उ० → अविदुषा, अधार्मिकेण पुत्रेण न कोऽपि लाभः ।
12. प्र० → कः पुत्रः सर्वदा दुःखकरः भवति ? उ० → मूर्खः पुत्रः ।
13. प्र० → कः जातः ? उत्तरः → येन जातेन वंशः समुन्नतिं याति ।

04-11-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

04-11-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् । संस्कृतानुवादः ।

√दा (देना) धात्वाधारितानि संस्कृतवाक्यानि →

लट् → सा मह्यं फलं ददाति । ते मह्यं पुस्तकं दत्तः । ताः तुभ्यं कलमं ददति ।
त्वं तस्मै रूप्यकानि ददासि । युवां दत्थः । यूयं दत्थ ।
अहं ददामि । आवां दद्वः । वयं ताभ्यः फलानि दद्मः ।

लोट् → बालकः ददातु । बालकौ दत्ताम् । बालकाः ददतु ।
त्वं फलं देहि । युवां पुस्तकं दत्तम् । यूयं कलमं दत्त ।
अहं ददानि । आवां ददाव । वयं ददाम ।

लङ् → सः अददात् । तौ अदत्ताम् । ते अददुः ।
त्वम् अददाः । युवाम् अदत्तम् । यूयम् अदत्त ।
अहम् अददाम् । आवाम् अदद्व । वयम् अदद्म ।

विधिलिङ्गम् → सः दद्यात् । तौ दद्याताम् । ते दद्युः ।
त्वं दद्याः । युवां दद्यातम् । यूयं दद्यात ।
अहं दद्याम् । आवां दद्याव । वयं दद्याम ।

लृट् → राजा दास्यति । राजानौ दास्यतः । राजानः दास्यन्ति ।
त्वं दास्यसि । युवां दास्यथः । यूयं दास्यथ ।
अहं दास्यामि । आवां दास्यावः । वयं दास्यामः ।

04-11-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

04-11-2020

साहित्यम् । शास्त्री

## छन्दविचार:

"सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ॥"

शूद्रक / मृच्छकटिकम् - 1 - 10

उत्तरम् → यगणादिनिर्णयः →

सुखं हि दुःखान्यनुभूय शोभते
। S । S S । । S । S । S
जगण तगण जगण रगण
घनान्धकारेष्विव दीपदर्शनम् ।
। S । S S । । S । S । S

पद्यस्य प्रत्येके चरणे द्वादशाक्षराः सन्ति । जगणादि-निर्णयं कृत्वा ज्ञायते यत् अस्मिन् पद्ये जगती छन्दस्य भेदः वंशस्थ वृत्तमस्ति ।
तल्लक्षणमस्ति → "जतौ तु वंशस्थमुदीरितं जरौ ।"

अलङ्कारः → अप्रस्तुतप्रशंसा, विरोधाभासः, उपमा च ।
गुणः → प्रसादः ।
रीतिः → लाटी ।

04-11-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।